
RNI No. : UTTBIL/2012/47279
SSN No. : 2320 - 0669

वर्ष - 04, अंक - 02

# "संस्कृत-गौरवम्-पत्रिका"

राष्ट्रवादी, आध्यात्मिक संस्कृत-हिन्दी त्रैमासिक पत्रिका

जनवरी, फरवरी, मार्च - वर्ष 2016 विक्रमी संवत् 2072



मूल्य 30/-

संस्थापक एवं प्रधान सम्पादक
आचार्य पं. शुभम
संरक्षक मण्डल :
जगद्गुरु स्वामी हंसदेवाचार्य जी महाराज
मा० सतपाल ब्रह्मचारी जी महाराज
श्रीमहन्त रेवती गिरि जी महाराज
महन्त ऋषिश्वरानन्द जी महाराज
मा० वीरभद्र सिंह जी
मा० हरीश रावत जी
मा० पोमेश शर्मा जी
आध्यात्मिक सलाहाकार :
स्वामी निरंजन देव जी महाराज
मा० चन्द्र प्रकाश कौशिक जी
आचार्य ललित कोठारी जी
हरीश देव तपडी वाले
सम्पादक मण्डल :
आचार्य सर्वेश कुमार तिवारी जी
डा० प्रकाश चन्द पन्त 'दीप'
डा० नवीन जसौला जी
परामर्श :
मा० अनुपमा रावत जी
मा० सुरेश कोच जी
मा० जयचन्द ठाकराण
मा० प्रेम सिंघला जी
जिला प्रभारी :
अतुल कुमार बिश्नोई
निर्देशक :
आचार्य प्रभु दयाल शर्मा जी
विशेष सहयोगी :
मा० अशोक कुमार शर्मा जी
मा० बलविन्दर सिंह उर्फ गगन जी
मा० संजीव गर्ग जी (विक्की)
मा० रजनीश शर्मा जी
मा० रतन जैन जी
मा० पवन गर्ग जी
मा० रणवीर ठाकराण जी
मा० हरीश भाराद्वाज जी
कानूनी सलाहाकार :
एड० दिवाकर चमोली जी
एड० सतीश जांगलान


राष्ट्रियसंस्कृतसंस्थानस्य साहाय्येन प्रकाशितम्
राष्ट्रिय संस्कृत संस्थान मानित विश्वविद्यालय
56, 57, इन्सटीट्यूटनल एरिया, डी ब्लॉक
जनक पुरी, नई दिल्ली

समस्त विवादों का न्यायक्षेत्र हरिद्वार न्यायालय मान्य होगा।

वर्ष : 4, अंक : 02
RNI No. : UTTBIL2012/47279
ISSN No. : 2320-0669



**समस्त देशवासियों को गणतंत्र दिवस, वसंत पंचमी, महाशिवरात्रि एवं होली के पावन पर्व पर आप सभी पाठकों को हार्दिक शुभकामनाऐं**



संस्थापक एवं प्रधान सम्पादक :
आचार्य पं. शुभम

## विषयानुक्रमणिका

| नाम | पृ.सं. |
|---|---|
| सम्पादक की कलम से | 2 |
| शिष्यधर्म: | 3 |
| उपनिषद् में पच्चमहाभूतों का आध्यात्मिक महत्त्व | 6 |
| जुगनूं | 9 |
| महाशिवरात्रि | 10 |
| अमरत्व वरदान प्राप्त सात मनीषियों में से एक है हनुमान जी | 12 |
| फिर कभी मत कहना | 14 |
| समाजसेवी व वरिष्ठ पत्रकार दुर्गाशंकर भाटी पंचतत्व में विलीन | 16 |
| आज भी युवाओं के आदर्श है स्वामी विवेकानंद | 19 |
| मुख्यमंत्री ने पूजा अर्चना के साथ किया अर्द्धकुंभ मेले का शुभारंभ | 21 |
| एक माँ की खामोश रूलाई | 22 |
| 'धर्म' का नाम बदनाम न करो | 23 |
| चाणक्य-नीति | 25 |
| राष्ट्रीय एकता का प्रतीक है मकर-संक्रान्ति | 26 |
| प्रकृति के उपासना के उत्सव | 28 |
| तीर्थयात्रा कैसे करें ? | 31 |
| घोषणा पत्र | 31 |
| सदस्यता फार्म | 32 |

स्वामी, मुद्रक, प्रकाशक एवं सम्पादक शुभम शर्मा द्वारा हिन्दू इलैक्ट्रिक प्रेस, ललतारौ पुल, हरिद्वार (उत्तराखण्ड) से प्रकाशित एवं कैलाश गली, भूपतवाला, हरिद्वार, उत्तराखण्ड से मुद्रित।

पत्रिका की विशेष जानकारी हेतु सम्पर्क करें :-
सम्पादक : आचार्य पं. शुभम
मो० : 9536517614
पत्राचार : कैलाश गली, भूपतवाला, हरिद्वार (उत्तराखण्ड)
E-mail : sanskritgaurbam@gmail.com, Fb : sanskritgaurbam

# ।। शिष्यधर्मः।।

डॉ.पङ्कजकुमार एस्. रावलः
आसि.प्रोफेसर, श्रीसोमनाथसंस्कृतयुनिवर्सिटी
सञ्चालित संस्कृतकोलेज, वेरावल, गुजरात

**शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्** ॥ (गीता-२-७)

शिष्यधर्मस्य प्रारम्भ उपनयनसंस्कारान्ते भवति । षोडशसंस्कारेष्वुपनयनसंस्कारः दशमः यज्ञोपवीतान्ते उपवी धृत्वा गायत्रीमन्त्रं गृहीत्वा वेदमध्येतुं ब्रह्मचारी ब्रह्मचर्याश्रमं प्रविशति ।

गुरुकुले छात्रस्य प्रवेशः तदेव तस्य शिष्यत्वेन जन्म । पितृभ्यां यदानीं बालकस्य जन्म भवति । तदानीमेव बालव पित्रोः जन्म भवति । तथैव यावत् छात्रः गुरुकुलं न प्रविशति तावत् गुरोरपि गुरुत्वेन जन्म न भवति ।

अर्थात् मातापुत्रयोः पितापुत्रयोः चिरन्तनः सम्बन्धः तथैव गुरुशिष्ययोरपि दीर्घकालिनः सम्बन्धः । इमौ द्वौ सम्बन्धौ परस्पर सद्व्यवहारेण समाजं विभूषयतः ।

यथा द्वाभ्यां सुभाषितश्लोकाभ्यां द्वयोः सम्बन्धेन तृतीयं कथं विलसति तद् पश्यामः-

**मणिना वलयं वलयेन मणिः मणिना वलयेन विभाति करः ।**
**पयसा कमलं कमलेन पयः पयसा कमलेन विभाति सरः ॥**

**(सु.र.भा.)**

**शशिना च निशा निशया च शशी शशिना निशया च विभातिः नभः ।**
**कविना च विभुः विभुना च कविः कविना विभुना च विभाति सभा ॥**

**(सु.र.भा.)**

तथैव पितृभ्यां सन्ततिः सन्तत्या च पितरौ सन्तत्या पितृभ्यां च गृहं विभाति । गुरुणा शिष्यः शिष्येण गुरुः गुरुणा शिष्येण गुरुकुलं गुरुशिष्यपरम्परा च विभाति ।

शिष्यधर्मस्य प्रारंभः सद्विवेकेन निष्ठया प्रामाणिकतया निश्चलवृत्या निश्छलवृत्या गुरुशुश्रूया च भवति । शिष्यः ज्ञानार्थं गुरुकुलं प्रविशति गुरुसान्निध्ये विविधाः विद्याभिः सदाचारेण सुसमृद्धः भवति । ततश्च गुरोराज्ञया सेवार्थं समाजं प्रविशति ।

षोडशसंस्कारेषु उपनयान्ते वेदारम्भः वेदारम्भान्ते समावर्तनं समावर्तनसंस्कारावसरे गुरुः शिष्याय दीक्षान्तप्रवचनं प्रयच्छति । सत्यं वद धर्मं चर स्वाध्यायान्माप्रमदः . . . . गुरुकुले निवसिता छात्रेण प्रायः गुरुकुलनियमानां परिपालनं क्रियते किन्तु शिष्यधर्मस्य परिपालनं तु गुरुकुले पठित्वा यदा छात्रः समाजाभिमुखः भवति ततः प्रभृतिः भवति ।

**"पुत्रस्य लक्षणं दोलायां"** नववधोः लक्षणानि **"गृहप्रवेशे देहल्यां"** शिष्यस्य लक्षणानि समर्पणे च भवति । अस्माकं भारतदेशः गुरुशिष्यपरम्परायां मौलिभूतः समग्रं विश्वं च प्रेरणाप्रदायकश्च विद्यते । नास्ति तत्र काचित् विप्रतिपत्तिः। तदर्थं सन्त्यस्माकं समाजे प्रसिद्धान्युदाहरणानि तान्यथा-

वरतन्तुकौत्सौ-

उदाहरणेऽस्मिन् कौत्सः गुरुदक्षिणायै समाजाभिमुखः भवति । नृपाशार्दूलं रघुं सम्मिल्य गुरुदक्षिणायै अपेक्षितां धनराशिमेव वाञ्छति तदा कौत्सस्य शिष्यधर्मः प्रकटितः भवति । गुरुणा पाठितः योगस्याष्टाङ्गेषु पञ्च यमेषुअपरिग्रहः तेन क्रियया प्रदर्शितः । येन पञ्च नियमेषु सन्तोषोऽपि स्वयमागतः । इयमस्ति शिष्यस्य शिष्यता ।

उद्दालकः आरुणिश्च -

गुरुशिष्यपरंपरायाः द्वितीयं सुप्रसिद्धमुदाहरणं यत्र गुरोराज्ञायाः किं महत्त्वं तच्छिष्येणारुणिना समाजं गत्वा क्रियया दर्शितम्।

**धौम्योपमन्युश्च-**

गुरुशिष्यपरंपरायां भिक्षार्थं गन्तव्यं भवति। भिक्षां प्राप्य गुरुं निवेदयेत्। तस्याः भिक्षायाः गुरु शिष्याय यावत् यद् प्रयच्छति तावत् तदेव स्वाहरार्थं स्वीकरणीयम् भवति। गुरुणा न प्रदीयते चेत् शिष्येणोपवासः करणीयः भवति।

**एकलव्यः -**

**- एकलव्येन सदृशः -**

**विद्यार्थी यः स्वयं गुरुः।**
**समर्पितश्च विद्यायै**
**सच्छात्रोऽस्ति मम प्रियः॥**

शिष्येणैकलव्येन गुरोः मूर्तिना परोक्षं ज्ञानं प्राप्तम्। तथाऽपि गुरुदक्षिणायां गुरवे अङ्गुष्ठः प्रत्यक्षः प्रदत्तः। इदमस्ति शिष्यधर्मस्योदाहरणम्।

**कृष्णसुदाम्नोः सांदीपनि गुरुकुले शिष्यधर्मः -**

पूर्णपुरुषोतमोऽपि

**"गुरोरनुग्रहेणैव पुमान् पूर्णः प्रशान्तये"** (भागवत-१०-८१) इति ।

पूर्णतायै प्रशांताय च गुरुकृपारनिवार्या। गुरुदक्षिणायै च समुद्रगतं गुरुपुत्रं सम्प्राप्य गुरुमात्रे समर्पितः। गुरुणा सामर्थ्यं दत्तं सामर्थ्यपूर्णस्य श्रीकृष्णस्य सविधे गुरुमात्रा सामर्थ्यानुगुणा गुरुदक्षिणा प्रकल्पिता।

समये समये गुरुभिः शिष्येभ्यः तस्य तस्य शिष्यस्य सामर्थ्यानुगुणां एव गुरुदक्षिणाणेप्सिता। प्रवर्तमान सन्दर्भे तु गुरवः सर्वकारात् समृद्धां गौरवपूर्णां धनराशिं प्रतिमासं प्राप्नुवन्ति। अतः नास्त्यधिकारः शिष्येभ्यः गुरुदक्षिणायै तथापि परंपरां वाहयितुं गुरवः गुरुदक्षिणामिच्छन्ति चेत् शिष्यः संस्कृतस्य संस्कृतेः संस्काराणां वेदपुराणादिधर्मशास्त्राणां सेवां कुर्यात्।

अस्माकं अनुपमायाः परंपरायाः वाहकश्च भूयात्।

छात्रः, शिष्यः, विद्यार्थी, अन्तेवासी अध्येता इत्यादयः बहवः शब्दाः अस्माकं परंपरायां विलसन्ति। प्रत्येकस्य शब्दस्य अर्थावबोधेन, पाठनेन कश्चिन्नूतनोऽपि परंपरावाहको भवेद् यदपेक्षया शब्दान् व्युत्पाद्यन्ते।

**"शास्ती रक्षति गुरुं शास्त्रं परंपरामिमां च शिष्यः॥"**
**"गुरवे शिरः दातुमपि न विचारयति स शिष्यः।"**
**"विद्यामात्रेकजीविनः विद्यार्थीनः।"**
**"विद्यायाः अर्थी, अभिलाषी, स विद्यार्थी।"**
**"गुरोः शास्त्राणां च नैरन्तर्येण सान्निध्यं यस्याऽस्ति स अन्तेवासी।"**
**"गुरोः निकटे शास्त्रस्य निकटे विद्याज्ञानयोः सन्निकटे योपविशति स अन्तेवासी।"**
**"छादयति, आच्छादयति गुरोः दोषान् यश्छात्रः।"**

"एतादृशैः छात्रैः चेष्टितः एव कश्चित् गुरुः नृपमपि शब्दैः प्रताडयति।"

गुरुपदनृपपदयोर्तुलनायां तद् पद्यं यथा-

**तव छत्र बलं मम छात्रबलं।**
**तव शस्त्रबलं मम शास्त्रबलं**
**तव कोशबलं मम कोशबलं**
वद हे नृप ते तव काऽधिकता॥ (सु.र.भा.)

विद्यार्थिनः गुणलक्षणविषयेऽपि प्रसिद्धाप्रसिद्धश्लोकाभ्यां कथितं विद्यते यत्-

**काकचेष्टा बकध्यानं श्वाननिद्रा तथैव च ।**
**अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणम् ॥** (सु.र.भा.)
**ज्ञानतृष्णा गुरौ निष्ठा सदाध्ययन दक्षता ।**
**एकाग्रतामहत्वेच्छा विद्यार्थी गुणपञ्चकम् ॥** (सदुक्तिकर्णामृत)

अर्जुनः श्रीकृष्णो स्वगुरुं पश्यति किन्तु श्रीकृष्णः अर्जुनं मित्रभावेन पश्यति । अत्राशयः गुरुभिः शिष्येषु मित्रभावः करणीयः किन्तु शिष्येश गुरुषु गुरुभाव एव रक्षणीयः ।

अत एव अर्जुनः उक्तवान् -

**"शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्"** । (गीता-२-७) इति ।

स एव अर्जुनः गीतायां श्रीकृष्णस्य स्वं प्रति मित्रभावं दृष्ट्वा उक्तवान्-

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ (गीता-११-४९)

अर्जुनस्य मित्रभूतः श्रीकृष्णः पश्चात् जगद्गुरुपदं प्राप्तवान् ।

**"कृष्णं वन्दे जगद्गुरुम्" इति ।**

अन्ते गुरुशिष्यसम्बन्धः निर्दोषः निश्चलः निस्वार्थः निर्लेपः निर्मानमोहः निर्गुणः निराकारश्च स्याच्चेदेव निरन्तरः भवति ।

शास्त्रेषु निर्दिष्टाः शिष्यधर्माः गुरोः कृपया गुरोः सेवया शास्त्राध्ययनेन च सदा सर्वदा मयि विलसेयुः । इति गुरुचरणयोर्प्रणामाञ्जलिं विनिवेद्य शिष्यधर्मशब्देभ्यः अत्रैव विरमामि ।

**शास्त्रेभ्यः बहवो धर्माः काले काले प्रचोदिताः ।**
**शिष्यत्वात् शिष्यधर्मेऽस्मिन् विश्वासो फलदायकः ॥** इति (स्वस्य)
राष्ट्रं विश्वगुरुं कर्तुं भारते भूरि मानवाः ।
शिष्यधर्मान् विदित्वैव शक्यमेतद्धि भूतले ॥ इति (स्वस्य)
**गुरुं विना न शिष्योऽस्ति विना शिष्यं गुरुर्नहि ।**
**ग्रन्थैश्च ग्रथितो तौ द्वौ मुक्तबद्धो परस्परौ ॥** इति (स्वस्य)

॥ इति शम् ॥


सन्दर्भग्रन्थाः

१) नीतिशतकम्
२) सदुक्तिकर्णामृतम्
३) सुभाषितरत्नभाण्डागारः
४) भगवद् गोमंडलम्
५) श्रीमद्भगवद्गीता
६) स्वस्य